अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते ।।१.७

asmākam tu viṣiṣṭā ye tān-nibodha dvijottama ।
nāyakā mama sainyasya samjnārtam tān bravīmi te ।।1.7

भवान् भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः ।
अश्वत्तामा विकर्णश्च सौमदत्तिस्तथैव च ।।१.८

bhavān bhīśmaṣca karṇaṣca kripaṣca samitinjayah ।
aṣvattāmā vikarṇaṣca saumadattistathaiva ca ।।1.8

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः।।१.९

anye ca bahavaḥ ṣūrā madarthe tyaktajīvitāh ।
nānā ṣastrapraharaṇāh sarve yuddha viṣāradāh ।।1.9

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्।।१.१०

aparyāptam tadasmākam balam bhīśmābhirakśitam ।
paryāptam tvidametešām balam bhīmābhirakśitam ।।1.10

अयनेषु च सर्वेषु यथाभागमवस्थिताः।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि।।१.११

ayaneśu ca sarveśu yathābhāgamavasthitāh ।
bhīśmamevābhirakśantu bhavantah sarva eva hi ।।1.11